# Vishnubrahmaukrita Shiva Stuti

# વિષ્ણુબ્રહ્મૌકૃતા શિવસ્તુતિઃ

## Document Information

Text title : Vishnubrahmaukrita Shiva Stuti

File name : viShNubrahmaukRRitAshivastutiH.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | sadAshivAkhyaH navamAMshaH | adhyAyaH 15 | vAvRRittashlokAH ||

Latest update : July 14, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 15, 2024

*sanskritdocuments.org*

# વિષ્ણુબ્રહ્મૌકૃતા શિવસ્તુતિઃ

(શિવરહસ્યાન્તર્ગતે સદાશિવાખ્યે)
વિષ્ણુરુવાચ ।
ઉગ્રોઽનુગ્રોઽસિ શમ્ભો પુરહર ભગવન્નકારે કપર્દિન્
ભૂતેશામરપાલ શઙ્કરમહાગ્રાસોઽસિ વેદેરિતઃ ।
માં પાહીશ્વર સામિસોમશકલાલઙ્કારમૌલે હર
સ્વામિન્દેવ દયાનિધે કરુણયા ત્વં સર્વસર્વેશ્વર ॥ ૧૧॥

હે મન્મથાન્તક મહેશ્વર દેવદેવ
શ્રીવામદેવ જિતકામ ઉમાસહાય ।
વ્યોમાદિભૂમ શ્રુતિસીમ સુખાદિધામ
સામૈસ્સ્તુવામ હર સોમ લલામ પાહિ ॥ ૧૨॥

ભો ભર્ગ ત્રિજગચ્છરણ્ય કરુણાતારુણ્યવારાન્નિધે
હે કાલાન્તક દેવદાનવસુહૃદ્યક્ષાદિસંસેવિત ।
વીક્ષાશિક્ષિતમન્મથાન્તક મહાદક્ષાદિદીક્ષાપહ
ઉક્ષાધ્યક્ષભગાક્ષિનાશક મહાદેવાદ્ય સંવીક્ષ્ય ॥ ૧૩॥

જટાજૂટાભૂષા તવ સુરસરિત્પૂરમસકૃત્
(જટાજૂટાભૂષાયિત સુરસરિત્પૂર અસકૃત્)
મહાઘોટીધાટી શ્રુતિવચન કોટીરક વિભો ।
વધૂટી શૈલાજ્જ(શૈલસ્ય)તરુણશશિચૂડાલ ભગવન્
અનાથં માં શમ્ભો સુખયતુ સનાથા તવ કૃપા ॥ ૧૪॥

વેદાશ્વસારથિવિધે રવિચન્દ્રચક્ર
ક્ષ્માસ્યન્દન ક્ષિતિધરાત્તશરાસનજ્ય ।
સોમગ્નિ વિષ્ણુશરકૃત્તપુરાદિકસ્ત્વં
જેતા રથેષ્વધિપતિસ્સુરસૈન્યપાલઃ ॥ ૧૫॥

વશ્યાન્પશ્યામિ શમ્ભો તવ વર કરુણાપાર પૂરૈકરાશાન્

વારાશીનમરાસુરદ્વિજવરાંલ્લોકાંશ્ચ લોક્યાનપિ ।
માં નિસ્તારય વિસ્તરોરુજઠરી કાન્તારતસ્ત્વં વિભો
બિભ્યન્તં કરુણારુણદ્ધિ યદિ તે ચિત્તે ન હૃત્તો હર ॥ ૧૬॥

બ્રહ્મોવાચ
યક્ષાધીશસખં વલક્ષભસિતાનઙ્ગાઙ્ગમુક્ષસ્થિતં
(યક્ષાધીશસખં વલક્ષભસિતાઙ્ગં સન્મહોક્ષસ્થિતં)
પક્ષીન્દ્રપ્રિયવાહપૂજિતમુમાવક્ષોજશૈલપ્રિયમ્ ।
ભિક્ષાપૂર્ણકપાલપાણિ સુરતાપક્ષસ્થિતં ત્વાં ભજે
ત્ર્યક્ષં દક્ષસુશિક્ષકં પુરહરં ચક્ષુઃશ્રવાકલ્પકમ્ ॥ ૨૦॥

માતઙ્ગત્વગલઙ્કૃતાઙ્ગમવિજાકાન્તં કુરઙ્ગાઙ્ગધૃ-
ગ્ધારીભૂતભુજઙ્ગરાજવિલસદ્ ગઙ્ગાકપર્દોજ્જ્વલમ્ ।
લીલાઙ્ગીકૃતલિઙ્ગસઙ્ગતમહાભાલે પતઙ્ગસ્ફુર-
જ્જ્વાલાલોલવરાઙ્ગભઙ્ગસુમહદ્ધિધ્યધ્યુત્તમાઙ્ગં ભજે ॥ ૨૧॥

હરપુરહર ઘોરકાકોદરહારાવ ભવોદ્ભવાં તથાર્તિમ્ ।
પરિહરકરાદ્યશઙ્કર ત્રિજગદ્વન્દ્યવિરામ દેવ પાહિ ॥ ૨૨॥

ભવ તવ વિભવાવલોકભાવા
ભવનાશાય કિલ પ્રબુદ્ધભાવાઃ ।
પ્રભવાય વિસૃષ્ટિ સંસ્થિતૌ
મમ કિઞ્ચિત્ત્વયિ ભાવ મા દધસ્વ ॥ ૨૩॥

શમ્ભો બાલેન્દુચૂડ દ્યુતિવિદિતદિશાસ્તોમસીમાનુધામ
પ્રેમા તે મહિમાવલોકન વિધૌ ક્વાહં હરિર્વાહરઃ ।
વિશ્વાધીશ્વરવેદજાલસુમહાનિઃશ્વાસવિશ્વાસિનં
તદ્વાતું પ્રભવેદ્ભવાન્ પ્રભુરહો કિં વચ્મિ તત્તેઽગ્રતઃ ॥ ૨૪॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિષ્ણુબ્રહ્મૌકૃતા શિવસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ શ્રીશિવરહસ્યમ્ । સદાશિવાખ્યઃ નવમાંશઃ । અધ્યાયઃ ૧૫ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . sadAshivAkhyaH navamAMshaH . adhyAyaH 15 . vAvRRittashlokAH ..

Proofread by Ruma Dewan

*Vishnubrahmaukrita Shiva Stuti*

pdf was typeset on July 15, 2024

Please send corrections to *sanskrit@cheerful.com*